24 25 a 26 27
कृपीटयोनिर्दमुनाः कृष्णवर्माशुशुक्षणिः ।
28 29 30 31
विभावसुरपांपित्तं जातवेदास्तनूनपात् ॥ ६३ ॥
b 32 33 34 35
वीतिहोत्रो बृहद्भानुराश्रयाशो धनञ्जयः ।
36 37 38 39
हिरण्यरेतास्तमोघ्नो रोहिताश्वो हुताशनः ॥ ६४ ॥

1 2 3 4 5 6 7
Flame 14. अर्चिः कीला ज्वाला वर्चस्तेजस्त्विषस्तथा ज्योतिः ।
8 9 10 11 12 13 14
हेतिर्द्युतिदीप्तिरुचः शिखाप्रभारश्मयः समानार्थाः ॥ ६५ ॥
1 2 3
Light 3. स्मृतः प्रकाश आलोक उद्द्योतश्च समास्त्रयः ।
c 1 2 1 2
Wife of Agni. अग्नायी कथ्यते स्वाहा धूम्या स्याद्धूमसंहतिः ॥ ६६ ॥ Mass of smoke 2.
1 2 1 Spark 2 1 2
Steam, vapour 2. ऊष्मा वाष्पः स्फुलिङ्गश्च कणा जिह्वास्तथार्चिषः । Tongue of the fire 2.
1 2 1 2
A fire brand. अलातमुल्मुकं ज्ञेयमुल्का ज्वालास्य निर्गता ॥ ६७ ॥ High flame of fire 2.
1 2 3 4 5
Names of the seven tongues of Agni. भवति हिरण्या कनका रक्ता कृष्णा सुप्रभा चान्या ।
6 7
अतिरक्ता बहुरूपेति सप्त सप्तार्चिषो जिह्वाः ॥ ६८ ॥
1 2 3 4 5 6
Fuel 6. एधस्तर्पणमिन्धनमेधः समिदिध्म इत्यभिन्नार्थाः ।
1 2 3 4 5
Ashes 5. भूतिर्भसितं भस्म क्षारं रक्षा च निर्दिष्टा ॥ ६९ ॥
1 2 3 1 2
A wood on fire Sylvan fire Forest fire. वनवह्निर्दवो दावो मेघवह्निरिरंमदः । Flash of lightning 2.
1 2 3 d 4
Submarine fire 4. और्वः समुद्रवह्निः स्याद्वाडवो वडवामुखः ॥ ७० ॥
1 2 e 3 4 5
Name of Pluto, the God of death 16. शमनः समवर्ती च प्रेतपतिः पितृपतिश्च कीनाशः ।
6 7 8 9
वैवस्वतः कृतान्तः कालिन्दीसोदरः कालः ॥ ७१ ॥
10 11 12 13 14
अन्तको धर्मराजश्च यमो दण्डधरो हरिः ।
15 16
दक्षिणाशापतिः सद्भिः श्राद्धदेवश्च कथ्यते ॥ ७२ ॥

a दमुना, दमना b वीतहोत्रो c आग्नेयी d वडवानलः, वाडवानलः e शमवर्ती ।